# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ५ | गुणाः – ५० |
| विषयः – सर्वदर्शनम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – वेदान्तपरिभाषा (अर्थापत्तिपरिच्छेदात् आन्तम्) | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**
१ अर्थापत्तेः लक्षणम्।
२ दृष्टार्थापत्तिः
३ श्रुतार्थापत्तिः

**प्रश्नः २ अनुपलब्धिप्रमाणं सोदाहरणं निरूपयत।**

**प्रश्नः ३ वेदान्तमतानुसारं प्रपञ्चस्य उत्पत्तिक्रमं प्रदर्शयत।**

**प्रश्नः ४ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**
१ चतुर्विधः अभावः।
२ ब्रह्मणः तटस्थलक्षणं स्वरूपलक्षणं च।
३ कर्तृत्वलक्षणम्।

**प्रश्नः ५ मोक्षसाधनानां श्रवणमननादीनां यथाग्रन्थं निरूपणं कुरुत।**

**प्रश्नः ६ लिङ्गशरीरोत्पत्तिं समासेन निरूप्य प्रलयस्य चातुर्विध्यं प्रदर्शयत।**

**प्रश्नः ७ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**
१ पञ्चीकरणप्रक्रियां व्याख्यात।
२ जीवस्य त्रिविधाम् अवस्थां व्याख्यात।
३ साधनचतुष्टयं व्याख्यात।

**प्रश्नः ८ जीवेश्वरचैतन्ययोः मतभेदान् सयुक्तिकं दर्शयत।**

**प्रश्नः ९ साधनसहितं मोक्षस्वरूपं विविच्यताम्।**

**प्रश्नः १० अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम् अतिलघूत्तरं यच्छत।**

१ का नाम अर्थापत्तिः?

२ का नाम अभिधानानुपपत्तिः?

३ वेदान्तमते कति प्रमाणानि सन्ति?

४ किं नाम अनुपलब्धिप्रमाणम्?

५ का नाम योग्यानुपलब्धिः?

६ घटादेः उत्पत्तेः पूर्वं योऽभावः सः कः?

७ प्रामाणानां प्रामाण्यं स्वतः उत्पद्यते उत परतः?

८ प्रमाणानां प्रामाण्यं कतिविधम्?

९ वेदान्तपरिभाषाकारः कः?

१० निखिलजगदुपादानत्वं कस्य लक्षणम्?

११ पृथिव्यां कति गुणाः प्राप्यन्ते?

१२ ज्ञानेन्द्रियाणि कति सन्ति? कानि च तानि?

१३ सूक्ष्मशरीरे कति अवयवाः भवन्ति?

१४ कार्यब्रह्मविनाशनिमित्तकः सकलकार्यनाशः कीदृशः प्रलयः?

१५ वेदान्तपरिभाषायां कति परिच्छेदाः सन्ति?

****